# ॥ कर्पूरादि स्तोत्रम् ॥

श्रीमहाकालकामेश्वराङ्कस्थायै श्रीमहाकामेश्वर्यै नमः

कर्पूरं मध्यमान्त्यस्वरपरिरहितं सेन्दुवामाक्षियुक्तं
बीजं ते मातरेतत्त्रिपुरहरवधु त्रिःकृतं ये जपन्ति ।
तेषां गद्यानि पद्यानि च मुखकुहरादुल्लसन्त्येव वाचः
स्वच्छन्दं ध्वान्तधाराधररुचिरुचिरे सर्वसिद्धिं गतानाम् ॥ १ ॥

ईशानः सेन्दुवामश्रवणपरिगतो बीजमन्यन्महेशि
द्वन्द्वं ते मन्दचेता यदि जपति जनो वारमेकं कदाचित् ।
जित्वा वाचामधीशं धनदमपि चिरं मोहयन्नम्बुजाक्षी-
वृन्दं चन्द्रार्धचूडे प्रभवति स महाघोरवालावतंसे ॥ २ ॥

ईशो वैश्वानरस्थः शशधरविलसद्वामनेत्रेण युक्तो
बीजं ते द्वन्द्वमन्यत् विगलितचिकुरे कालिके ये जपन्ति ।
द्वेष्टारं घ्नन्ति ते च त्रिभुवनमपि ते वश्यभावं नयन्ति
सृक्कद्वन्द्वास्रधाराद्वयधरवदने दक्षिणे त्र्यक्षरेति ॥ ३ ॥

ऊर्ध्वे वामे कृपाणं करकमलतले छिन्नमुण्डं तथाधः
सव्ये चाभीर्वरञ्च त्रिजगदघहरे दक्षिणे कालिके च ।
जप्त्वैतन्नाम ये वा तव मनुविभवं भावयन्त्येतदम्ब

तेषामष्टौ करस्थाः प्रकटितरदने सिद्धयस्त्र्यम्बकस्य ॥ ४ ॥

वर्गाद्यं वह्निसंस्थं विधुरतिललितं तत्त्रयं कूर्चयुग्मं
लज्जाद्वन्द्वञ्च पश्चात् स्मितमुखि तदधष्ठद्वयं योजयित्वा ।
मातर्ये ये जपन्ति स्मरहरमहिले भावयन्तः स्वरूपं
ते लक्ष्मीलास्यलीलाकमलदलदृशः कामरूपा भवन्ति ॥ ५ ॥

प्रत्येकं वा द्वयं वा त्रयमपि च परं बीजमत्यन्तगुह्यं
तन्नाम्ना योजयित्वा सकलमपि सदा भावयन्तो जपन्ति ।
तेषां नेत्रारविन्दे विहरति कमला वक्त्रशुभ्रांशुबिम्बे
वाग्देवी देवि मुण्डस्रगतिशयलसत्कण्ठि पीनस्तनाढ्ये ॥ ६ ॥

गतासूनां बाहुप्रकरकृतकाञ्चीपरिलस-
न्नितम्बां दिग्वस्त्रां त्रिभुवनविधात्रीं त्रिनयनाम् ।
श्मशानस्थे तल्पे शवहृदि महाकालसुरत-
प्रयुक्तां त्वां ध्यायन् जननि जडचेताऽपि कविः ॥ ७ ॥

शिवाभिर्घोराभिः शवनिवहमुण्डास्थिनिकरैः
परं सङ्कीर्णानां प्रकटितचितायां हरवधूम् ।
प्रविष्टां सन्तुष्टामुपरिसुरतेनातियुवतीं
सदा त्वां ध्यायन्ति क्वचिदपि च न तेषां परिभवः ॥ ८ ॥

वदामस्ते किं वा जननि वयमुच्चैर्जडधियः
न धाता नापीशो हरिरपि न ते वेत्ति परमम्।
तथापि त्वद्भक्तिः मुखरयति चास्माकममिते
तदेतत् क्षन्तव्यं न खलु पशुरोषः समुचितः॥ ९॥

समन्तादापीनस्तनजघनधृग्यौवनवती-
रतासक्तः नक्तं यदि जपति भक्तस्तव मनुं।
विवासास्त्वां ध्यायन् गलितचिकुरस्तस्य वशगाः
समस्ताः सिद्धौघा भुवि चिरतरं जीवति कविः॥ १० ॥

समाः सुस्थीभूतो जपति विपरीतां यदि सदा
विचिन्त्य त्वां धायन्नतिशयमहाकालसुरताम्।
तदा तस्य क्षौणीतलविहरमाणस्य विदुषः
कराम्भोजे वश्या पुरहरवधू सिद्धिनिवहाः॥ ११ ॥

प्रसूते संसारं जननि भवती पालयति च
समस्तं क्षित्यादि प्रलयसमये संहरति च।
अतस्त्वं धातासि त्रिभुवनपतिः श्रीपतिरपि
महेशोऽपि प्रायः सकलमपि किं स्तौमि भवतीम्॥ १२ ॥

अनेके सेवन्ते भवदधिकगीर्वाणनिवहान्
विमूढास्ते मातः किमपि नहि जानन्ति परमम्।

समाराध्यामाद्यां हरिहरविरिञ्चादिविबुधैः
प्रपन्नोऽस्मि स्वैरं रतिरसमहानन्दनिरताम्॥ १३॥

धरित्री कीलालं शुचिरपि समीरोऽपि गगनं
त्वमेका कल्याणी गिरिशरमणी कालि सकलम्।
स्तुतिः का ते मातर्निजकरुणया मामगतिकं
प्रसन्ना त्वं भूया भवमनुन भूयान्मम जनुः॥ १४॥

श्मशानस्थः सुस्थो गलितचिकुरो दिक्पटधरः
सहस्रन्त्वर्काणां निजगलितवीर्येण कुसुमम्।
जपन् त्वत्प्रत्येकं मनुमपि तव ध्याननिरतो
महाकालि स्वैरं स भवति धरित्रीपरिवृढः॥ १५॥

गृहे सम्मार्जन्या परिगलितवीर्यं हि चिकुरं
समूलं मध्याह्ने वितरति चितायां कुजदिने।
समुच्चार्य प्रेम्णा मनुमपि सकृत् कालि सततं
गजारूढो याति क्षितिपरिवृढः सत्कविवरः॥ १६॥

स्वपुष्पैराकीर्णं कुसुमधनुषो मन्दिरमहो
पुरो ध्यायन् ध्यायन् यदि जपति भक्तस्तव मनुम्।
स गन्धर्वश्रेणीपतिरपि कवित्वामृतनदी-
नदीनः पर्यन्ते परमपदलीनः प्रभवति॥ १७॥

त्रिपञ्चारे पीठे शवशिवहृदि स्मेरवदनां
महाकालेनोच्चैर्मदनरसलावण्यनिरताम् ।
समासक्तो नक्तं स्वयमपि रतानन्दनिरतो
जनो यो ध्यायेत्त्वामयि जननि स स्यात् स्मरहरः ॥ १८ ॥

सलोमास्थि स्वैरं पललमपि मार्जारमसिते
परञ्चौष्ट्रं मैषं नरमहिषयोश्छागमपि वा ।
बलिं ते पूजायामयि वितरतां मर्त्यवसतां
सतां सिद्धिः सर्वा प्रतिपदमपूर्वा प्रभवति ॥ १९ ॥

वशी लक्षं मन्त्रं प्रजपति हविष्याशनरतो
दिवा मातर्युष्मच्चरणयुगलध्याननिपुणः ।
परं नक्तो नग्नो निधुवनविनोदेन च मनुं
जपेल्लक्षं स स्यात् स्मरहरसमानः क्षितितले ॥ २० ॥

इदं स्तोत्रं मातस्तव मनुसमुद्धारणजनुः
स्वरूपाख्यं पादाम्बुजयुगलपूजाविधियुतम् ।
निशार्धं वा पूजासमयमधि वा यस्तु पठति
प्रलापस्तस्यापि प्रसरति कवित्वामृतरसः ॥ २१ ॥

कुरङ्गाक्षीवृन्दं तमनुसरति प्रेमतरलं

वशस्तस्य क्षौणीपतिरपि कुबेरप्रतिनिधिः ।
रिपुः कारागारं कलयति च तं केलिकलया
चिरं जीवन्मुक्तः प्रभवति स भक्तः प्रतिजनुः ॥ २२ ॥

॥ इति श्रीमन्महाकालविरचितं श्रीमद्दक्षिणाकालिकायाः दिव्यस्वरूपाख्यं कर्पूरादि स्तोत्रं समाप्तम् ॥

## || karpūrādi stotram ||

śrīmahākālakāmeśvarāṅkasthāyai śrīmahākāmeśvaryai namaḥ

karpūraṁ madhyamāntyasvaraparirahitaṁ senduvāmākṣiyuktaṁ
bījaṁ te mātaretattripuraharavadhu triḥkṛtaṁ ye japanti |
teṣāṁ gadyāni padyāni ca mukhakuharādullasantyeva vācaḥ
svacchandaṁ dhvāntadhārādhararucirucire sarvasiddhiṁ gatānām || 1 ||

īśānaḥ senduvāmaśravaṇaparigato bījamanyanmaheśi
dvandvaṁ te mandacetā yadi japati jano vāramekaṁ kadācit |
jitvā vācāmadhīśaṁ dhanadamapi ciraṁ mohayannambujākṣī-
vṛndaṁ candrārdhacūḍe prabhavati sa mahāghoravālāvataṁse || 2 ||

īśo vaiśvānarasthaḥ śaśadharavilasadvāmanetreṇa yukto
bījaṁ te dvandvamanyat vigalitacikure kālike ye japanti |
dveṣṭāraṁ ghnanti te ca tribhuvanamapi te vaśyabhāvaṁ nayanti
sṛkkadvandvāsradhārādvayadharavadane dakṣiṇe tryakṣareti || 3 ||

ūrdhve vāme kṛpāṇaṁ karakamalatale chinnamuṇḍaṁ tathādhaḥ
savye cābhīrvarañca trijagadaghahare dakṣiṇe kālike ca |
japtvaitannāma ye vā tava manuvibhavaṁ bhāvayantyetadamba
teṣāmaṣṭau karasthāḥ prakaṭitaradane siddhayastryambakasya || 4 ||

vargādyaṁ vahnisaṁsthaṁ vidhuratilalitaṁ tattrayaṁ kūrcayugmaṁ
lajjādvandvañca paścāt smitamukhi tadadhaṣṭhadvayaṁ yojayitvā |
mātarye ye japanti smaraharamahile bhāvayantaḥ svarūpaṁ
te lakṣmīlāsyalīlākamaladaladṛśaḥ kāmarūpā bhavanti || 5 ||

pratyekaṁ vā dvayaṁ vā trayamapi ca paraṁ bījamatyantaguhyaṁ

tannāmnā yojayitvā sakalamapi sadā bhāvayanto japanti |
teṣāṁ netrāravinde viharati kamalā vaktraśubhrāṁśubimbe
vāgdevī devi muṇḍasragatiśayalasatkaṇṭhi pīnastanāḍhye || 6 ||

gatāsūnāṁ bāhuprakarakṛtakāñcīparilasa-
nnitambāṁ digvastrāṁ tribhuvanavidhātrīṁ trinayanām |
śmaśānasthe talpe śavahṛdi mahākālasurata-
prayuktāṁ tvāṁ dhyāyan janani jaḍacetā'pi kaviḥ || 7 ||

śivābhirghorābhiḥ śavanivahamuṇḍāsthinikaraiḥ
paraṁ saṅkīrṇānāṁ prakaṭitacitāyāṁ haravadhūm |
praviṣṭhāṁ santuṣṭāmuparisuratenātiyuvatīṁ
sadā tvāṁ dhyāyanti kvacidapi ca na teṣāṁ paribhavaḥ || 8 ||

vadāmaste kiṁ vā janani vayamuccairjaḍadhiyaḥ
na dhātā nāpīśo harirapi na te vetti paramam |
tathāpi tvadbhaktiḥ mukharayati cāsmākamamite
tadetat kṣantavyaṁ na khalu paśuroṣaḥ samucitaḥ || 9 ||

samantādāpīnastanajaghanadhṛgyauvanavatī-
ratāsaktaḥ naktaṁ yadi japati bhaktastava manuṁ |
vivāsāstvāṁ dhyāyan galitacikurastasya vaśagāḥ
samastāḥ siddhaughā bhuvi cirataraṁ jīvati kaviḥ || 10 ||

samāḥ susthībhūto japati viparītāṁ yadi sadā
vicintya tvāṁ dhāyannatiśayamahākālasuratām |
tadā tasya kṣauṇītalaviharamāṇasya viduṣaḥ
karāmbhoje vaśyā puraharavadhū siddhinivahāḥ || 11 ||

prasūte saṁsāraṁ janani bhavatī pālayati ca
samastaṁ kṣityādi pralayasamaye saṁharati ca |
atastvaṁ dhātāsi tribhuvanapatiḥ śrīpatirapi
maheśo'pi prāyaḥ sakalamapi kiṁ staumi bhavatīm || 12 ||

aneke sevante bhavadadhikagīrvāṇanivahān
vimūḍhāste mātaḥ kimapi nahi jānanti paramam |
samārādhyāmādyāṁ hariharaviriñcādivibudhaiḥ
prapanno'smi svairaṁ ratirasamahānandaniratām || 13 ||

dharitrī kīlālaṁ śucirapi samīro'pi gaganaṁ
tvamekā kalyāṇī giriśaramaṇī kāli sakalam |

stutiḥ kā te mātarnijakaruṇayā māmagatikaṁ
prasannā tvaṁ bhūyā bhavamanuna bhūyānmama januḥ || 14 ||

śmaśānasthaḥ sustho galitacikuro dikpaṭadharaḥ
sahasrantvarkāṇāṁ nijagalitavīryeṇa kusumam |
japan tvatpratyekaṁ manumapi tava dhyānanirato
mahākāli svairaṁ sa bhavati dharitrīparivṛḍhaḥ || 15 ||

gṛhe sammārjanyā parigalitavīryaṁ hi cikuraṁ
samūlaṁ madhyāhne vitarati citāyāṁ kujadine |
samuccārya premṇā manumapi sakṛt kāli satataṁ
gajārūḍho yāti kṣitiparivṛḍhaḥ satkavivaraḥ || 16 ||

svapuṣpairākīrṇaṁ kusumadhanuṣo mandiramaho
puro dhyāyan dhyāyan yadi japati bhaktastava manum |
sa gandharvaśreṇīpatirapi kavitvāmṛtanadī-
nadīnaḥ paryante paramapadalīnaḥ prabhavati || 17 ||

tripañcāre pīṭhe śavaśivahṛdi smeravadanāṁ
mahākālenoccairmadanarasalāvaṇyaniratām |
samāsakto naktaṁ svayamapi ratānandanirato
jano yo dhyāyettvāmayi janani sa syāt smaraharaḥ || 18 ||

salomāsthi svairaṁ palalamapi mārjāramasite
parañchauṣṭraṁ maiṣaṁ naramahiṣayośchāgamapi vā |
baliṁ te pūjāyāmayi vitaratāṁ martyavasatāṁ
satāṁ siddhiḥ sarvā pratipadamapūrvā prabhavati || 19 ||

vaśī lakṣaṁ mantraṁ prajapati haviṣyāśanarato
divā mātaryuṣmaccaraṇayugaladhyānanipuṇaḥ |
paraṁ nakto nagno nidhuvanavinodena ca manuṁ
japellakṣaṁ sa syāt smaraharasamānaḥ kṣititale || 20 ||

idaṁ stotraṁ mātastava manusamuddhāraṇajanuḥ
svarūpākhyaṁ pādāmbujayugalapūjāvidhiyutam |
niśārdhaṁ vā pūjāsamayamadhi vāa yastu paṭhati
pralāpastasyāpi prasarati kavitvāmṛtarasaḥ || 21 ||

kuraṅgākṣīvṛndaṁ tamanusarati premataralaṁ
vaśastasya kṣauṇīpatirapi kuberapratinidhiḥ |
ripuḥ kārāgāraṁ kalayati ca taṁ kelikalayā

ciraṁ jīvanmuktaḥ prabhavati sa bhaktaḥ pratijanuḥ || 22 ||

|| iti śrīmanmahākālaviracitaṁ śrīmaddakṣiṇākālikāyāḥ divyasvarūpākhyaṁ karpūrādi stotraṁ samāptam ||

www.kamakotimandali.com